
॥ श्री दुर्गायै नमः ॥

दुर्गा-पूजार्चन-विधि



केशवानन्द जी महाराज

निर्धन- निकेतन, हरिद्वार
श्री दुर्गा–मन्दिर



पूज्य ऋषिजी दुर्गा पूजार्चन में ध्यानम

॥ श्री दुर्गायै नमः ॥

दुर्गा-पूजार्चन-विधि



ऋषि केशवानन्द जी महाराज

अध्यक्ष ।

...र्धन- निकेतन, खड़खड़ी (हरिद्वार) फोन-४३

प्रकाशक:—

श्री बाल ब्रह्मचारी मिशन (रजि०)
निर्धन निकेतन, खड़खड़ी, हरिद्वार।

प्रथम संस्करण— २,०००
जनवरी— १९८४

मूल्य- ५-००

मुद्रण :—

श्री कपिल मुद्रणालय, महानिर्वाणी अखाड़ा, कनखल।

'दो शब्द'

भारत के ऋषि-मुनियों विद्वान् सन्तमहापुरुषों का तपोमय सिद्धजीवन लोककल्याणकारी सर्वसिद्धिदाता रहा है। उन के लोकसिद्धजीवन में सांसारिक ऋद्धिसिद्धियों के गुप्त साधन आरम्भ से ही संसार की बिगड़ी बनाने वाले तथा अनहोने मनोरथों की भी पूर्ति करने वाले देखे जाते हैं।

इसी महान् लक्ष्य को सामने लिए हमारे परमश्रद्धेय पूज्य ऋषिप्रवर श्री केशवानन्द जी महाराज, अध्यक्ष-संचालक निर्धन निकेतन खड़खड़ी, हरिद्वार ने एकमात्र भक्तजनों के कल्याण हेतु सन्तहृदय से जहां 'दुर्गा-लक्षचण्डी-महायज्ञ' का सिद्धिदाता सफल वैदिक-अनुष्ठान दो वर्ष पूर्व ही एक ऐतिहासिक रूप में पूर्ण किया, वहां अपने देश-विदेश के हर सद्गृहस्थ भक्तजन शिष्यगण के जीवन को सुखसमृद्धिमय बनाने के लिए ही यह 'दुर्गा-पूजार्चन-विधि' का महत्वपूर्ण शास्त्रीय संकलन भी प्रकाशित कराया है, जो कि मानवमात्र के मनोरथ सिद्ध करने वाला अपने ही ढंग का एक निराला ग्रन्थ है। कोई भी श्रद्धालु आस्थावान् मानव इस सर्वसिद्धिदाता माता दुर्गा जी की शास्त्रीय पूजा विधि को अपने सद्गुरुदेव पूज्य ऋषि जी महाराज का 'कृपा-प्रसाद' मान कर हृदय की श्रद्धा भावना में पूरा-पूरा लाभ प्राप्त करेगा, यही हमारी हृदय की लोकमंगलकारिणी सद्भावना है। इधर मुद्रण-व्यवस्था में भी सहसा होने वाली कमियों के लिए हम अपने सम्मान्य भक्तजन पाठकों से क्षमाप्रार्थी हैं क्योंकि संस्कृत में मुद्रणव्यवस्था प्रायः दुष्कर ही रहती है, तथापि हमें एक ही भरोसा है, कि माता की आराधना में बालक की तोतली अशुद्ध भाषा उच्चारणादि सब कुछ होता है किन्तु माँ को केवल बालक के हृदय का सीधा प्यारमात्र चाहिए। 'शाण्डिल्य'

विषय-विवरण

❁ दुर्गायै नमः ❁

* अथ प्रातः स्मरणम् *

प्रातःकाल उठकर साधक शैय्या पर पद्मासन लगाकर गुरु एवं परम गुरु का भृकुटि के मध्य आज्ञाचक्र में ध्यान करें तथा इस देवी गायत्री मन्त्र का मानसिक उच्चारण करते हुये आठ प्राणायाम करें।

ॐ महादेव्यै विद्महे दुर्गायै धीमहि तन्नो देवी प्रचोदयात्

तदनन्तर आनन्दमय होकर अपने में देवी की अनुभूति करें और यह मन्त्र पढ़े —

अहं देवी न चान्यास्मि ब्रह्मैवाहं न शोकभाक्।
सच्चिदानन्द स्वरूपोऽहं आत्मानमिति चिन्तयेत्॥

इसके उपरान्त पृथ्वी माता की प्रार्थना करें

समुद्र वसने देवि ! पर्वतस्तनमण्डले
विष्णु पत्नि! नमस्तुभ्यं पाद स्पर्शं क्षमस्व मे॥

शौच दन्तधावन करने के बाद स्नान करते हुये यह मन्त्र पढ़े-

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जले ऽस्मिन् सन्निधिं कुरु॥

लाल रंग की रेशमी धोती पहनकर कुङ्कुमादि से अलंकृत होकर पूजा मन्दिर या पूजास्थान पर जाकर पूर्व अथवा उत्तर की ओर मुख करके आसन पर बैठकर आसन शुद्धि करें तथा मन्त्र पढ़कर प्राथना करें।

ॐ पृथ्वीति मन्त्रस्य मेरु पृष्ठ ऋषिः सुतलं छन्दः कूर्मोदेवता आसनोपवेशने विनियोगः॥

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।।
गंधाक्षत से अपने आसन के नीचे पृथ्वी का पूजन करें
चावल अथवा सफेद सरसों बाँयें हाथ में लेकर दायें
हाथ से ढककर अभिमन्त्रित करें ।

ॐ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन पूजाकर्म समारभे ।।

सभी दिशाओं में सरसों छांड़ें ।

प्राच्यै नम :, अवाच्यै नमः , प्रतीच्यै नमः, उदीच्यै नमः
ऊर्ध्वायै नमः ,भूम्यै नमः, ।

भैरव दीपज्योति का पूजन करें—

भो दीप देवरूपस्त्व कर्मसाक्षि ह्यविघ्नकृत् ।
यावत्कर्म समाप्तिः स्यात् तावत्त्वं सुस्थिरो भव ।।
तीक्ष्ण द्रंष्ट्र , महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि ।।

पुष्प, गन्ध, अक्षत हाथ में लेकर स्वस्तिवाचन करें—

ॐ गणानान्त्वा गणपति ँ हवामहे प्रियाणान्त्वा प्रियपति ँ हवामहे निधीनान्त्वा निधिपति ँ

ह्वामहे व्वसोमम ॥ आहमजानिगर्भधमत्वमजासि गर्भधम् ॥ १ ॥ ॐ स्वस्ति नऽ इन्द्रो वृद्धः श्रवाः स्वस्तिनः पूषा विश्व वेदाः ॥ स्वस्तिनस्तार्क्ष्योऽ अरिष्ट नेमिः स्वस्तिनो वृहस्पतिर्दधातु ॥ २ ॥ पयः पृथिव्यां पय ओषधीषु पयोदिव्यन्तरिक्षेपयोधाः पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ ३ ॥ विष्णोरराट मसि विष्णोःश्नप्त्रेस्थो विष्णोःस्यूरसि विष्णोर्ध्रुवोसि वैष्णव मसि विष्णवे त्वा ॥४॥ अग्निर्देवता बातोदेवता सूर्योदेवता चन्द्रमादेवता वसवो देवता रुद्रादेवताऽऽ दित्यादेवता मरुतो देवता विश्वे देवादेवता वृहस्पति र्देवतेन्द्रो देवता वरुणो देवता॥५ ॥ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्ति र्वनस्पतयः शान्तिर्विश्वे देवाः शान्ति र्ब्रह्म शान्ति : सर्व ँ शान्तिः शान्ति रेव शान्तिः सामा शान्तिरेधि शान्तिः सुशान्ति र्भवतु ॥ ६ ॥ विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रंतन्न आसुव ॥ ७ ॥

एतन्ते देव सवितुर्यज्ञं प्राहुर्वृहस्पतये ब्रह्मणे । तेन

यज्ञमवतेन यज्ञपतिन्तेन मामव मनो जूतिर्जुषतामा ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ७ समिमं दधातु ॥ विश्वेदेवा स इहमादयन्तामो३म् प्रतिष्ठ एषवै प्रतिष्ठानाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति ॥

ॐ शान्तिः सुशान्तिः सर्वारिष्ट शान्तिर्भवतु ॥

ॐ सुमुखश्चैकदन्तश्च कपिलोगजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥

शुक्लाम्बरधरंदेवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशान्तये ॥

अभीप्सितार्थं सिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥
सर्व मंगलमांगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥

सर्वदा सर्व कार्येषु नास्ति तेषाममंगलम् ।
येषां हृदिस्थो भगवान्मंगलायतनो हरिः ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥
विनायकं गुरुं भानुं ब्रह्मविष्णु महेश्वरान् ।
सरस्वतीं प्रणम्यादौ शान्तिकार्यार्थं सिद्धये ॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ।
देवादिशन्तु नः सिद्धिं ब्रह्मेशान जनार्दनाः ॥
वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

ॐ सिद्धि बुद्धि सहिताय श्री मन्महागणाधिपतये नमः । ॐ वाणी हिरण्यगर्भाभ्यां नमः ॥ ॐ लक्ष्मी नारायणाभ्यां नमः ॥ ॐ उमा महेश्वराभ्यां नमः ॥ ॐ शची पुरन्दराभ्यां नमः॥ॐ मातृपितृचरण कमलेभ्यो नमः ॥ ॐ कुल देवताभ्यो नमः ॥ ॐ इष्ट देवताभ्यो नमः ॥ ॐ ग्राम देवताभ्यो नमः ॥ ॐ स्थान देवताभ्यो नमः ॥ ॐ वास्तु देवताभ्यो नमः ॥ ॐ सर्वेभ्यो देवेभ्यो नमः ॥ ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥ ॐ सर्वेभ्यो तीर्थेभ्यो नमः ॥ श्री गुरु चण कमलाभ्या नमः ॐ एतत्कर्मप्रधान श्री दुर्गादैव्यै नमः ॥

दाहिने हाथ में जल अक्षत लेकर संकल्प करे —

संकल्प

ॐ शक्तिः शक्तिः शक्तिः अद्य ब्रह्मणो द्वितीये प्रह-राद्धें श्री श्वेत वाराहकल्पे जम्बू द्वीपे भारत वर्षे आर्या वर्तान्तर्गते ब्रह्मावर्तैकदेशे अमुकनाम्नि सम्वत्सरे अमु-कायने अमुकऋतौ अमुकमासे अमुक पक्षे अमुक तिथौ अमुकवासरे अमुकयोगे अद्य शुभपुण्यतिथौ अमुकगोत्रः अमुकनामाहं सर्वाभीष्टसिद्धयर्थं कलशस्थापन दुर्गा पूजा कुमारी पूजादि कर्मअहं करिष्ये ।।

।। सूर्य को अर्घ्य देवें

ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ।।

गणपति पूजनम्—

गन्धाक्षत पुष्पादि से गणपति जी का पूजन कर प्रार्थना कर

गजाननं भूत गणादि सेवितं,
कपित्थ जम्बू फल चारु भक्षणम्
उमासुतं शोक विनाश कारकं
नमामि विघ्नेश्वर पाद पंकजम् ।।

ॐ भक्तार्त्तिनाशनपराय गणेश्वराय,

सर्वेश्वराय शुभदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय
भक्त प्रसन्न वरदाय नमो नमस्ते ।।
विघ्नेश्वराय वरदाय सुरप्रियाय,
लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय सित.सर्पविभूषिताय,
गौरी सुताय गणनाथ नमो नमस्ते ।।

अनया पूजया सिद्धिबुद्धिसहितो महागणपतिः सांगः सप.रवारः प्रीयताम् ।।

पंचोंकार पूजन करें ।।

आवाहयाम्यहं देवमोंकारं परमेश्वरम्
त्रिमात्रं त्र्यक्षरं दिव्यं त्रिपदं च त्रिदैवकम् ।
त्र्यक्षरं त्रिगुणाकारं सर्वाक्षरमयं शुभम्
त्र्यणवं प्रगवं हंसं स्रष्टारं परमेश्वरम् ।।
अनादि निधनं देवमप्रमेयं सनातनम् ।
परं परतरं बीजं निर्मलं निष्कलं शुभम् ।।

।। षोडश मातृका पूजन करें ।।

ॐ गौरी पद्मा शची मेधा सावित्री विज.या जया।
देवसेना स्वधा स्वाहा मातरो लोक मातरः ।।

हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुल देवताः ।
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोड़श ॥
अनया पूजया सांगाः सपरिवाराः गौर्यादि षोडश
मातरः प्रीणन्तु न मम ॥

॥ योगिनी पूजन करें ॥

ॐ आवाहयाम्यहं देवी योंगिनी परमेश्वरी ।
योगाभ्यासेन सन्तुष्टा पराध्यानसमन्विता ॥
दिव्य कुण्डलसंकाशा दिव्य ज्वाला त्रिलोचना ।
मूर्तिमती ह्यमूर्ति च उग्रा चैवोग्ररूपिणी ॥
अनेक भाव संयुक्ता संसारार्णवतारिणी ।
यज्ञं कुर्वन्तु निर्विघ्नं श्रेयो यच्छन्तु मातर : ॥
दिव्ययोगी महायोगी सिद्धयोगी गणेश्वरी ।
प्रेताशी डाकिनी काली कालरात्रि निशाचरी ॥
हुँकारी सिद्धवेताली खर्परी भूतगामिनी ।
ऊर्ध्वकेशी विरूपाक्षी शुष्काङ्गी माँसभोजिनी ॥
फूत्कारी वीरभद्राक्षी धूम्राक्षी कलहप्रिया ।
रक्ता च घोररक्ताक्षी विरूपाक्षि भयंकरी ॥
चौरिका मारिका चण्डी वाराही मुण्ड धारिणी ।
भैरवी चक्रिणी क्रोधा दुर्मुखी प्रेतवासिनी ॥

कालाक्षी मोहिनी चक्री कंकाली भुवनेश्वरी ।
कुण्डला ताल कौमारी यमदूती करालिनी ॥
कौशिकी यक्षिणी यक्षी कौमारी यंत्र वाहिनी ।
दुर्घंटे विकटे घोरे कपाले विषलंघने ॥
चतुः षष्टिः समारव्याता योगिन्यो हि वरप्रदाः ।
त्रैलोक्ये पू जता नित्यम् देवमानुषयोगिभिः ॥

॥ वास्तु-पूजन करे ॥

अथातः संप्र वक्ष्यामि यदुक्तं वास्तुपूजनम् ।
येन पूजा विधानेन कर्म सिद्धिस्तु जायते ॥
अनन्तं पुण्डरीकाक्षं फणाशत विभूषितम् ।
विद्यु द्वन्धूकसंकाशं कूर्मारूढं प्रपूजयेत् ॥

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे-ये दि वि तेभ्यः सर्पेभ्यो नमः ॥ वासुक्याद्यष्ट कुलनागेभ्यो नमः ॥

॥ कलश स्थापना तथा पूजन करें ॥

कलश कुम्भाय नमः

ब्रह्मणा निर्मितस्त्वंहि मन्त्रैरेवामृतोद्भव ।
प्रार्थया म च त्वां कुम्भ वांछितार्थन्तु देहि मे ॥

ॐ वरुणस्योत्त भनमसिवरुणस्यस्कंभसर्जनीस्थो वरुण-

स्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋत-सदनमासीद् ॥

॥ अथ कलश पूजनम् ॥

ऋग्वेदाय नमः ॥ १ ॥ यजुर्वेदाय नमः ॥ २ ॥ साम वेदायनमः ॥ अथर्व वेदाय नमः ॥ कलशाय नमः ॥ रुद्राय नमः ॥ समुद्राय नमः ॥ गंगायै नमः ॥ यमुनायै नमः । अञ्जलिं कृत्वा कलशं स्पृशेत् ॥

ॐ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ।
मूले तस्यस्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागरास्सप्त सप्त द्वीपा वसुन्धरा ।
ऋग्वेदोऽथयजुर्वेदः सामवेदो ह्यथर्वणः ॥
अंगैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ।
अत्र गायत्री सावित्री शान्ति-पुष्टिकरी सदा ॥
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥

॥ अथ नवग्रह-पूजन-मंत्र ॥

सूर्य पूजन-मंत्र —

ॐ आकृष्णेन रजसावर्तमानो निवेशयन्नमृतंमर्त्यं च

हिरण्ययेनसविताारथेनदेवोयाति भुवनानि पश्यन् ॥
ॐ सूर्याय नमः ॥

चन्द्र पूजन मंत्र —

ॐ इमंदेवा असपत्न ँ सुवध्वंमहते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्र स्येन्द्रियाय । इम-मुष्य पुत्रममुष्यै पुत्रमस्यैविशऽएष वोमी राजा सोमोऽस्माकं ब्राह्मणाना ँ राजा ।

मंगल पूजन-मन्त्र —

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽ अयम् ॥ अपा ँ रेता ँ सिजिन्वति ॥

बुध पूजन-मंत्र

ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते स ँ सृजेथा मयंच ॥ अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा-यजमानश्च सीदत ॥

बृहस्पति पूजन-मन्त्र —

ॐ बृहस्पते अतियदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु॥ यद्दीदयच्छवसऽ ऋतप्रजाततदस्मासुद्रविणन्धेहि चित्रम् ॥

शुक्र पूजन-मंत्रः —

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिवत् क्षत्रं पयः सोमम्प्रजापतिः ऋतेन सत्यमिन्द्रियं विपान ँ शुक्र-

अन्धसऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतंमधु ।।

शनि पूजन-मंत्र—

ॐ शन्नोदेवीरभीष्टय आपो भवन्तु पीतये ।। शंयो रभिस्रवन्तु नः ।।

राहु पूजन मंत्र—

ॐ कया नश्चित्र आभुवदूती सदा वृधः सखा ।। कया शचिष्ठया वृता ।।

केतु पूजन-मंत्र—

ॐ केतुं कृण्वन्नकेतवे पेशो मर्याऽअपेशसे समुषद्भिर-जायथाः ।।

नवग्रह पुष्पाञ्जलि से प्रार्थना करें—

ॐ ब्रह्मामुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतोबुधश्च ।
गुरुश्चशुक्रश्शनिराहु केतवः
सर्वेग्रहाः शान्तिकरा भवन्तु ।।

फूल हाथों में लेकर अपने हृदय में दुर्गा माता का ध्यान करें—

ॐ जटाजूट समायुक्ता मर्द्धेन्दु कृतलक्षणाम् ।
लोचन त्रय संयुक्तां पद्मेन्दु सदृशाननाम् ।। १ ।।
अतसी पुष्प वर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नव यौवन सम्पन्नां सर्वाभरण भूषिताम् ।। २ ।।
सुचारु दशनां तद्वत्पीनोन्नतपयोधराम् ।
त्रिभंगस्थान संस्थानां महिषासुरमर्दिनीम् ।। ३ ।।

त्रिशूलं दक्षिणेदध्यात्खड्गं चक्रं क्रमादधः ।
तीक्ष्ण वाणं तथाशक्ति वामतोपि निबोधत ।।४।।
खेटकं पूर्णं चापं च पाशमंकुशमूर्द्धवजम् ।
घंटां परशुमेवापि वामतः सन्निवेशयेत् । ५ ।।
अधस्तान्महिषं तद्वदद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवंतद्वद्दानवं खड्गपाणिकम् ।। ६ ।।
हृदिशूलेन निर्भिन्नं निर्दयंयन्त्र भूषितम् ।
रक्तरक्तीकृताङ्गञ्च रक्तविस्फारितेक्षणम् ।७।।
वेष्टितं नागपाशेन भृकुटी भीषणाननम् ।
सपाश वामहस्तेन धृतकेशं च दुर्गया ।। ८ ।
वमद्रुधिर वक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समंसिंहोपरि स्थितम् ।९ ।
किंचिदूर्ध्वं तथा वाममंगुष्ठो महिषोपरि ।
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत् ।।१०।।
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्ड नायिका ।
चण्डा चण्डवती चैव चंडरूपाति चण्डिका ।।११।।
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेत्सततं देवीं धर्म कामार्थ मोक्षदाम् ।।१२।।

ऐसा ध्यान कर हाथ में लिये फूल कलश अथवा दुर्गा-मूर्ति पर चढ़ा देवे और प्रार्थना कर—

ॐ महिषघ्नीं महादेवीं कुमारीं सिंहवाहिनीम् ।
दानवांस्तर्जयन्तीञ्च सर्वकामदुघां शिवाम् ॥ १ ॥
ध्यायामि मनसा दुर्गां नाभि मध्ये व्यवस्थिताम् ।
आगच्छ वरदे! देवि! दैत्यदर्पनिपातिनि! ॥२॥
पूजां गृहाण सुमुखि ! नमस्ते शंकरप्रिये ।
सर्वतीर्थमयं वारि सर्व देवसमन्वितम् ॥ ३ ॥
इमं घटं समागच्छ तिष्ठदेवगणैः सह ।
दुर्गेदेवि समागच्छ सान्निध्यमिहकल्पय ।४ ।
बलिपूजां गृहाणत्वमष्टाभिः शक्तिभिः सह ।
अस्मिन्घटेसमागच्छस्थितिं त्वं कृपया कुरु ।।
रक्षांकुरु सदा भद्रे! विश्वेश्वरि! नमोऽस्तु ते ॥
एह्येहि दुर्गे! दुरितौघनाशिनि प्रचण्ड दैत्यौघ-
विनाश कारिणि! उमे! महेशार्द्ध शरीर धारिणि ॥
स्थिरा भव त्वं मम यज्ञ कर्म्मणि ।।

देवी का ध्यान कर मूलाधार कुण्डलिनी को उठाकर उसे शिव-संयुक्त कर वायुवीज नासापुट दशा में पुष्प हाथ में लिये दुर्गा की प्रार्थना करे।

ऐहि दुर्गे ! महाभागे ! रक्षार्थं मम सर्वदा ।
आवाहयाम्यहं देवि ! सर्व कामार्थ-सिद्धये ॥

इस मंत्र को पढ़कर वह पूजापुष्प कलश अथवा यन्त्र पर चढ़ा देवे और स्वय को देवीरूप मानकर देवीपूजन करे।

॥ अथ वेदोक्त दुर्गा–पूजन विधिः ॥

अथ दुर्गा का आवान करे—

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥
ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सभूमि ँ सर्वतस्पृत्वात्यतिष्ठद्दशांगुलम् ॥
ॐ आगच्छेह महादेवि! सर्वं सम्पत्प्रदायिनि ।
यावद् व्रतं समाप्येत तावत्त्वं सन्निधो भव ॥

आसन प्रार्थना के लिये पुष्प हाथ में लेवे—

ॐ ताम् आवह जातवेदो लक्ष्मीमनवगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषाहनम् ॥
ॐ पुरुषएवेद ँ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥
अनेक रत्न संयुक्तं नानामणिगणान्वितम् ।
कार्तस्वरमयं दिव्यमासनं प्रतिगृह्यताम् ॥

भगवती के पैर धुलाने के लिए श्यामार्क,विष्णुक्रांता, कमल पुष्प, दूर्वा, जल आदि लेवे ।

ॐ अश्वपूर्णां रथमध्या हस्तिनादप्रमोदिनीम् ।
श्रियंदेवीमुपह्वये श्रीर्मा देवीजुषताम् ॥

ॐ एतावानस्य महिमातो ज्यायांश्चपूरुषः ।
पादोस्यविश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥
गंगादि सर्व तीर्थेभ्यों मया प्रार्थनयाहृतम् ।
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥

अर्घ्यंम—दूर्वा, तिल, दर्भा, सर्षप, यव, पुष्प, अक्षत, चन्दन, जल में मिलाकर अर्पण करे ॥

ॐ काँसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीम् तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वयेश्रियम् ।

ॐ त्रिपादूर्ध्वंउदैत्पूरुषः पादोस्येहाभवत्पुनः ।
ततोविश्वंव्येक्रामत्साशनानशने अभि ॥
निधीनां सर्व रत्नानां त्वमनर्घ्यंगुणाह्यसि ।
सिंहोपरिस्थिते देवि ! गृहाणार्घ्यं नमोऽस्तुते ॥

मधुपर्क हाथ में लेवे (दधि. मधु, घृत, समान भाग में न हों)।

ॐ मधुव्वाता ऋतायते मधुक्षरन्तिसिन्धवः माध्वीर्नः सन्त्वोषधीः ॥ मधु घृत दधि युक्तम् पात्रयुग्मसमन्वितम् । मधुपर्कं गृहाण त्वं शुभदा भव शोभने! ॥

आचमन के लिये जल लेवे ।

ॐ चन्द्र प्रभासां यशसा ज्वलन्तीं
श्रियं लोकेदेव जुष्टामुदाराम् ।
तां पद्मिनीं शरणमहं प्रपद्ये
अलक्ष्मीर्मेनश्यता त्वां वृणे ॥

ॐ ततो विराऽ जायतव्विराजोऽधिपूरुषः ।
सजातोऽ अत्यरिच्यतपश्चाद्भूमिमथोपुरः ।।
कर्पूरेण सुगन्धेन सुरभिस्वादु शीतलम् ।
तोयमाचमनीयार्थं देवि ! त्वंप्रतिगृह्यताम् ।।

पहले मलापकर्षण स्नान करावे ।

ॐ आदित्यवर्णे तपसोऽधिजातो
वनस्पतिस्तव वृक्षोऽथबिल्वः ।
तस्यफलानितपसानुदन्तु
मायान्तरायाश्च वाह्या अलक्ष्मीः ।।

ॐ तस्माद्यज्ञात्सर्वहुतः संभृतंपृषदाज्यम् ।
पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्याश्चये ।।
मन्दाकिन्याः समानीतैर्हेमांभोरुहवासितैः ।
स्नानं कुरुष्वदेवेशि ! सलिलैश्चसुगन्धिभिः ।।

फिर से आचमन देवे—

उच्छिष्टोप्यशुचिर्वापियस्यस्मरणमात्रतः ।
शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ।।

सुगन्धित तैल व इत्र मलकर स्नान करावे—

ॐ अ ँ शुनातेऽअ ँशुः पृच्यतांपरुषापरुः ।
गन्धस्ते सोममवतु मदायरसोऽच्युतः ।।

ॐ स्नेहं गृहाण स्नेहेन लोकेश्वरि महालये।
सर्वलोकेषु शुद्धात्मन् ! ददामिस्नेहमुत्तमम् ॥

पञ्चामृत–स्नान

दूध से स्नान करावे—

ॐ पयः पृथिव्यांपयऽओषधीषु पयोदिव्यन्तरिक्षे-
पयोधाः। पयस्वतीः प्रदिशः सन्तुमह्यम् ॥
कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्।
पावनं यज्ञ हेतुश्च पयः स्नानार्थमर्पितं ॥

दही से स्नान करावे—

ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्यवाजिनः।
सुरभिनो मुखाकरत्प्रण आयु ँ षितारिषत् ॥
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम् ॥

घृत से स्नान करावे—

ॐ घृतं घृत पावानः पिवत व्वसां वसापावानः
पिवतान्तरिक्षस्य हविरसि स्वाहा ॥ दिशः प्रदिश
ऽआदिशोव्विदिशउद्दिशोदिग्भ्यः स्वाहा ॥
नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥

शहद से स्नान करावे—

ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ७ रजः ।।
मधुद्यौरस्तुनः पिता ।।
तरु पुष्पसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।

शर्करा से स्नान करावे—

ॐ अपा ७ रसमुद्वयस ७ सूर्ये सन्त ७ समाहितम् ।। अपा ७ रसस्य योरसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वा जुष्टं गृह्णाम्येषते योनिरिन्द्रायत्वा जुष्टतमम् ।

इक्षुसार समुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिकादिव्या स्नानार्थं प्रतिगृह्यताम् ।।

पंचामृत मिलाकर स्नान करावे—

ॐ पंचनद्यः सरस्वतीमपियन्ति सस्रोतसः सरस्वती तु पंचधा सो देशे भवत्सरित् ।।
पयोदधि घृतं चैव मधु च शर्करान्वितम् ।
पंचामृतंमयानीतं स्नानार्थं प्रतिगृह्यताम् ।।

शुद्ध स्नान के बाद गन्ध (चन्दन) अर्पित करे—

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ।।

मलयाचल सम्भूतं चन्दनागुरुसंभवम् ।
चन्दनं देवि: देवेशि! स्नानार्थं प्रतिगृह्यताम् ।।

सुगन्धित (उबटन) लगाकर स्नान करावें—

ॐ अ ᳫ शुनातेऽ अ ᳫ शुः पृच्यतारुपरुषापरुः ।
गन्धस्ते सोम मवतुमदायरसोऽ अ च्युतः ।।
नाना सुगन्धि द्रव्यं च चन्दनं रजनीयुतम् ।
उद्वर्त्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ।।

शुद्ध जल से स्नान करावे—

ॐ शुद्धवालः सर्व शुद्ध वालो मणिवालस्तऽ आश्विनाः श्येताश्येताक्षोरूणस्ते रुद्राय पशुपतये कर्णायामाऽअवलिप्ता रौद्रा नभोरूपाः पर्जन्याः ।।

अब पुरुष सूक्त से अथवा श्री सूक्त से मूर्ति पर शंख से महाभिषेक कराना चाहिए ।।

इसके बाद धोती आदि धारण कराकर सिंहासन पर दुर्गा-मूर्ति को स्थापित कर अनेक पूजा पदार्थों से पूजन करना चाहिए—

दो वस्त्र समर्पित करे—

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतो सुराष्ट्रोऽस्मिन् कीर्तिं वृद्धिं ददातु मे ।।
तस्माद्यात्सर्वहुतऽऋचः सामानि जज्ञिरे ।
छन्दाᳫसि जज्ञिरे तस्माद्यजस्तस्मादजायत ।।

पट्ट क़ूलं युगं देवि ! कचुकेन समन्वितम् ।
परिधेहि कृपां कृत्वा दुर्गे ! दुर्गतिनाशिनि ! ॥

यज्ञोपवीत समर्पित करे—

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं ।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ॥
ॐ तस्मादश्वाऽअजायन्त येके चो भयादतः ।
गावोह जज्ञिरे तस्मात्तस्माज्जाता अजाथयः ॥
स्वर्णं सूत्र मयं दिव्यं ब्रह्मणा निर्मित पुरा ।
उपवीतं मया दत्तं गृहाण परमेश्वरि ॥

चन्दन समर्पित करे—

ॐ गन्धद्वारांदुराधर्षां नित्यपुष्टाँ करीषिणीम् ।
ईश्वरीं सर्व भूतानां तामिहोपह्वये श्रियम् ॥
ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवा अजयन्त साध्याऽऋषयश्च ये ॥
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्य सुमनोहरम् ।
विलेपनं च देवेशि ! चन्दनं प्रति गृह्यताम् ॥

सौभाग्यसूत्र चढ़ावे—

ॐ सौभाग्य सूत्रं वरदे ! सुवर्ण-मणि संयुतम् ।
कंठे बध्नामि देवेशि ! सौभाग्यं देहि मे सदा ॥

अक्षत अर्पण करे—

ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ।
अस्तोषतस्वभानवोविप्रानविष्ठयोमती योजान्विन्द्रते हरी ॥

अक्षतान्निर्मलान् शुद्धान् मुक्तामणि समन्वितान् ।
गृहाणेमान्महादेवि ! देहि मे निर्मलां धियम् ॥

हरिद्रा चूर्ण चढ़ाये—

हरिद्रारञ्जिते देवि ! सुखसौभाग्यदायिनी ।
तस्मात्त्वांपूजयाम्यत्र सुखंशान्ति प्रयच्छ मे ॥

गुलाल समर्पण करे—

कुङ्कुमं कान्तिदं दिव्यं कामिनीकामसंभवम् ।
कुङ्कुमेनार्चिते देवि ! प्रसीद परमेश्वरि! ॥

सिन्दूर समर्पण करे—

सिन्दूरमरुणाभासं जपाकुसुमसन्निभम् ।
अर्पितं ते मया देवि ! प्रसीद परमेश्वरि! ॥

कज्जल चढ़ावे—

चक्षुर्भ्यां कज्जलंरम्यं सुभगे शान्ति कारकम् ।
कर्पूरज्योति रुत्पन्नं गृहाण परमेश्वरि! ॥

दूर्वांकुर चढ़ावे—

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलांपद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोम आवह ॥

ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि एवा-
नोदूर्वे प्रतनुसहस्त्रेण शतेन च ॥
दूर्वादलेश्यामलेत्वं मही रूपे हरिप्रिये. ।
अतोदूर्वाभिराभिस्त्वां पूजयामि सदाशिवे! ॥

विल्व पत्र चढ़ावे—

ॐ आर्द्रां यः करिणींयष्टि सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्यमयीं लक्ष्मीं जात वेदोम आवह ॥
ॐ नमो विल्मने च कवचिने च नमो वर्मिणे च
वरूथिने च नमः ॥ श्रुताय च श्रुतसेनाय च
नमो दुन्दुभ्बायचाह नन्याय च नमः ॥
अमृतोद्भवः श्री वृक्षोमहादेवप्रियः सदा ।
विल्वपत्रं प्रयच्छामि पवित्रं सुरेश्वरि! ॥

पंच पल्लव चढ़ावें—

ॐ तांम आवह जातवेदो लक्ष्मीमनपगामिनीम् ॥
यस्यां हिरण्यं प्रभूतिं गावोक्ष स्योश्वान् विन्देयं-
पुरुषाहनम् ॥
ॐ अश्वत्थेवो निषदनं पर्णेवोव्वसतिकृता ।
गोभाज इत्किलासथयत्सनवथ पूरुषम् ॥
गृहद्वारे चोग्रमपिदुष्टासुर निर्हिणि ।
पूजां करोमि चार्वांगि ! पल्लवैर्नंदनोद्भवैः ॥

फलमाला चढ़ावे—

ॐ महादेवो च विद्महे विष्णुपत्नी च धीमहि
तन्नो देवीः प्रचोदयात् ।।

ॐ याः फलिनीर्याऽअफलाऽपुष्पायाश्चपुष्पिणीः ।
वृहस्पति प्रसूतास्तानोमुञ्चन्त्वᳪहसः ।।

शरदकाले समुद्भूतां निशुम्भासुर मर्दिनिः ।
फलमालां वरां देवि ! गृहाणसुर-पूजिते ! ।।

रत्नमाला पहनावे—

ॐ परिव्राजपतिः कविरग्निर्हव्यान्यक्रमीत् ।।
दधद्रत्नानिदाशुषे ।।

ॐ कर्दमेन प्रजाभूतामयि सम्भ्रम कर्दम ।
श्रियं वासय मे गृहे मातरं पद्म मालिनीम् ।।

मुक्ताफलयुतां मालां रत्नवैडूर्य सुप्रभाम् ।
माणिक्यस्वर्णग्रथितां गृह्यतांवरदे ! नमः ।।

पुष्पमाला चढ़ावे

ॐ आपः स्रजन्तुस्निग्धानिचिक्लीतवसयेगृहे ।
(नी) निचदेवीं मातर श्रियम वासय मे कुले ।।

ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे
नक्षत्राणिरूपमश्विनौव्यात्तम् ।। इष्णन्निषणा-
मुम्म इषाण सर्वलोकम्मऽषाण ।।

पद्म शंखज पुष्पादि शतपत्रैर्विचित्रिताम् ।
पुष्प मालां प्रयच्छामि गृहाण त्वं सुरेश्वरि! ॥

पुष्प चढ़ावे—

ॐ मनसः काममाकूतिं वाचः सत्यमशीमही ।
पशूनांरूप मन्नस्य मयि श्रीः श्रयतां यशः ॥
ॐ यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरूपादाउच्येते ॥
पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः ।
पूजा ते क्रियते देवि पुष्पाणिप्रतिगृह्यताम् ॥
मंदारपारिजातादिपाटली केतकानि च ।
जाति चंपक पुष्पाणिं गृहांणेमानि शोभने! ॥

दुर्गा पूजा में पुष्प चढ़ावे—

कुन्द मन्दार पुन्नाग पाटली नागकेशरम् ।
श्राएवधं कर्णिकारं जयन्ती नवमल्लिका ।
सौगन्धिकंसकंकोलं पुन्नागाशोकमल्लिका ।
अन्यान्यपि सुगन्धीनि पुष्पपत्राणि देशिकैः ॥

आभूषण चढ़ावे—

हार कंकण-केयूर-मेखला कुण्डलादिभिः ।

रत्नाढ्य कुण्डलोपेतं भूषणं प्रतिगृह्यताम् ।।
अलंकाराभावे अक्षतान् समर्पयामि ।।

सुगन्ध (इत्र) द्रव्य चढ़ावे—

ॐ अहिरिवभोगैः पर्येतिबाहुं ज्यायाहेतिं परि-
परिवाधमानः ।। हस्तघ्नोविश्वाव्वयुनानिविद्वान्पु-
मान्पुमा ७ सम्परिपातुविश्वतः ।।
चन्दनागरु कर्पूर कुङ्कुमं रोचनं तथा ।।
कस्तूर्यादि सुगन्धांश्च सर्वांगेषुविलेपयेत् ।।

मालान्त पूजन के बाद अङ्ग पूजा करे—

ॐ दुर्गायै नमः पादौ पूजयामि नमः ।
ॐ महाकाल्यै नमः गुल्फौ पूजयामि नमः ।।
ॐ मंगलायै नमः जानुद्वयं पूजयामि नमः ।।
ॐ कात्यायन्यै नमः ऊरूद्वयं पूजयामि नमः ।।
ॐ भद्रकाल्यै नमः कटिं पूजयामि नमः ।।
ॐ कमलवासिन्यैनमः नाभिं पूजयामि नमः ।।
ॐ शिवायै नमः उदरं पूजयामि नमः ।।
ॐ क्षमायै नमः हृदयं पूजयामि नमः ।
ॐ कौमार्यै नमः स्तनौ पूजयामि नमः ।।
ॐ उमायै नमः हस्तौ पूजयामि नमः ।।
ॐ महागौर्यै नमः दक्षिणवाहुं पूजयामि नमः ।।

ॐ वैष्णव्यै नमः वामबाहुं पूजयामि नमः ॥
ॐ रमायै नमः स्कन्धौ पूजयामि नमः ॥
ॐ स्कन्दमात्रे नमः कंठं पूजयामि नमः ॥
ॐ महिष मर्दिन्यै नमः नेत्रेपूजयामि नमः ॥
ॐ सिंह वाहिन्यै नमः मुखं पूजयामि नमः ॥
ॐ माहेश्वर्यै नमः शिरः पूजयामि नमः ॥
ॐ कात्यायन्यै नमः सर्वाङ्गं पूजयामि नमः ॥
इत्यङ्ग पूजनम् ॥

धूप अर्पण करे व अक्षत छोड़कर घंटा बजावे--

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ॥
सूक्तं पंच दशर्चञ्च श्री कामः सततं जपेत् ॥
ॐ धूरसि धूर्व धूर्वंतन्धूर्वतं योऽस्मान्धूर्वति तं
धूर्वयं वय धूर्वामः ॥ दैवानामसिवन्हितम ँ
सस्नितमं पप्रितमञ्जुष्ट मन्देवहूतमम् ॥
दशाङ्गगुग्गुलं धूपं चन्दनागरु संयुतम् ।
समर्पितं मया भक्तया देवि! त्वं प्रतिगृह्यताम् ॥

दीपक जलावे व अक्षत छोड़कर घटा बजावे—

सरसिज निलयेसरोजहस्ते धवलतरांशुकगन्ध
माल्यशोभे ॥ भगवति ! हरिवल्लभे ! मनोज्ञे !
त्रिभुवन भूतिकरि ! प्रसीद मह्यम् ॥

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो वर्चो ज्योति र्वचः स्वाहा ॥ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥

घृतवर्ति समायुक्ता महातेजोमहोज्ज्वलम् ।
दीपं दास्यामि देवेशि! सुप्रीता भव सर्वदा ॥
घृतदीपं सितवर्ति युतं देवतादक्ष भागे ।
तैलदीपं रक्तवर्ति युतं देवता वाम भागे ॥

नैवेद्य चढ़ावे—

नैवेद्यं निवेदयामि नमः ॥

जलेनाभ्युक्ष्य ॥ गन्धपुष्पाभ्यामाच्छाद्य ॥ धेनुमुद्रया अमृतीकृत्य ॥ योनिमुद्रां प्रदर्श्य ॥ सत्यन्त्वर्तेन परिषिञ्चामि इति प्रातः । (ऋतंत्वा-सत्येन परिषिञ्चामि इति सायं)

घण्टांवादयेत् ॥

ग्रासमुद्रां प्रदर्श्य ॥ प्राणाय स्वाहा, अङ्गुष्ठ अनामिकाकनिष्ठाभिः ॥ ॐ अपानाय स्वाहा अङ्गुष्ठ तर्जनीमध्यमाभिः ॥ ॐ उदानाय स्वाहा अंगुष्ठ मध्यमाऽनामिकाभिः ॥ ॐ व्यानाय स्वाहा अंगुष्ठतर्जनीमध्यमाभिः ॥ ॐ समानाय स्वाहा सर्वांगुलीभिः ॥ ॐ आर्द्रां पुष्करिणीं पुष्टि

सुवर्णां हेममालिनीम् ॥ सूर्यां हिरण्मयीं लक्ष्मीं
जातवेदो म आवह ।

ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकां ३ अक-
ल्पयन् ॥

अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
नैवेद्यं गृह्यतां देवि ! भक्तिं मे ह्यचलां कुरु ॥

मध्ये-मध्ये आचमनीयं समर्पयामि नमः ॥
उत्तरापोषणार्थं पुनः पुनर्नैवेद्यं निवेदयामि नमः ॥
पुनराचमनीयं समर्पयामि नमः ॥

आचमन देवे—

ॐ आर्द्रां यः करिणीं यष्टिं पिंगलां पद्म-माल-
नीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

ॐ यत्पुरुषेण हविषा देवा यज्ञ मतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्मइध्मः शरद्धविः ॥

आचम्यतां त्वया देवि ! भक्ति मे ह्यचलां कुरु ।
ईप्सितं मे वरं देहि परत्र च परांगतिम् ॥

करोद्वर्तन करे—

करोद्वर्तनकं देवि ! सुगन्धैः परिवासितैः ।

ईप्सितं मे वरं देहि परत्र च पराङ्गतिम् ।।
करोद्वर्तनार्थं गन्धं समर्पयामि नमः ।।

हस्त प्रक्षालन करे--

गन्धतोयं समानीतं सुवर्णकलशेस्थितम् ।
हस्त प्रक्षालनार्थाय पानीयं ते निवेदये ।

ऋतु-फल चढावे--

ॐ याः फलिनीर्या अफला अपुष्पा याश्चपुष्पिणीः।
बृहस्पति प्रसूतास्ता नोमुञ्चन्त्वᳬंहसः ।।
द्राक्षा खर्जूर कदली पनसाम्रकपित्थकम् ।
नारिकेलेक्षुजंब्वादि फलानि प्रतिगृह्यताम् ।।

ताम्बूल-पुङ्गीफल (पानसुपारी) चढ़ावे—

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतिं गांवो दास्योश्वान्विन्देयं पुरूषाहनम् ।।
ॐ सप्तास्या सन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अवध्न पुरुष पशुम् ।।
एलालवङ्ग कस्तूरी कर्पूरैः पुष्पवासितां ।
वीटिकां मुख वासार्थमर्पयामि सुरेश्वरि ।।

दक्षिणा-द्रव्य चढ़ावे --

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरे-

कऽआसीत् । सदाधार पृथिवींद्यामुतेमां कस्मै-
देवाय हविषा विधेम ।।


पूजा फल समृध्यर्थं त्वाग्रे स्वर्णमीश्वरि: ।
स्थापिता तेन मे प्रीता पूर्णान्कुरु मनोरथान् ।।

दुर्गा जी का ध्यान करे—

दुर्गे ! स्मृता हरसि भीतिमशेषजन्तोः ।
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।।
दारिद्रयस् दुःख भयहारिणि का त्वदन्या ।
सर्वोपकारकरणाय सदार्द्रचित्ता ।। इति नत्वा ।।

ॐ देवा आयान्तु यातुधाना अपयान्तु । दुर्गे !
देवि! यजनं रक्षस्वेति भूमौ प्रादेशं कृत्वा प्रणमेत् ।।

।। इति शुभं भूयात् ।।



॥ आरती श्री दुर्गा जी की ॥

जय अम्बे गौरी मैया जै अम्बे गौरी टेक॥

मंगल मूरति मैया जय आनन्द करणी ।
तुमको निशदिन ध्यावत हरि ब्रह्मा शिवजी ॥जय०॥

मांग सिन्दूर विराजत टीकोमृगमद को ।
उज्ज्वल से दोउ नैना चन्द्र वददनीको ॥जय०॥

कनक समान कलेबर रक्ताम्बर राजै ।
रक्त पुष्प गल माला, कण्ठन पर साजै ॥जय०॥

केहरि वाहन राजत, खड्ग खप्पर धारी ।
सुर नर मुनि जन सेवत, तिनके दुःखहारी ॥जय०॥

कानन कुण्डल शोभित, नासाग्रे मोती ।
कोटिकचन्द्र दिवाकर, राजत सम ज्योती ॥जय०॥

शुम्भ निशुम्भ बिदारे, महिषासुरधाती ।
धूम्र विलोचन नैना निशदिन मदमाती ॥जय०॥

चण्ड मुण्ड संहारे शोणित बीज हरे ।
मधु कैटभ दोऊ मारे सुरभय हीन करे ॥जय०॥

ब्रह्माणी रुद्राणी तुम कमला रानी ।
आगम निगम बखानी, तुम शिव पटरानी ॥जय०॥

चौंसठ योगिनि गावत, नृत्य करत भैरों ।
बाजत ताल मृदंगा, और बाजे डमरू ।।जय।।
तुम ही जग की माता, तुम ही हो भरता ।
भक्तन की दुःख हरता सुख संपतिकरता ।।जय०।।
भुजा चार अति शोभित, वर अभय धारी ।
मन वांछित फल पावत, सेवत नर नारी ।।जय०।।
कंचन थाल विराजत, अगर कपुर वाती ।
श्री मालकेतु मे राजत, कोटि रतन ज्योती ।।जय०।।
ये अम्बे जी की आरति, जो कोई नर गावै ।
कहत शिवानन्द स्वामी, सुख सम्पति पावै ।।जय०।।

।। मन्त्र पुष्पाञ्जलिः ।।

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।। तेहनाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्तिदेवाः ।।

राजाधिराजायप्रसह्य साहिने नमोवयं वैश्रवणाय कुर्महे ।।

समेकामान्कामकामायमह्यं ।। कामेश्वरो वैश्रवणो ददातु कुवेराय वैश्रवणाय राजाधिराजाय महाराजाय नमः ।।

ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सर्वायुष आन्तादापराधीत् ॥ पृथिव्यै समुद्रपर्यन्ताया एकराडिति ॥ तदप्येष श्लोकोभिगीतो मरुतः परिवेष्टारो मरुत्तस्या वसन् गृहे ॥ आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥

ॐ विश्वतश्चक्षुरुत विश्वतो मुखो बाहुरुतविश्वतस्पात् ॥ सम्बाहुभ्यान्धमति सम्पतत्रैर्द्यावाभूमी जनयन्देवएकः ॥

सेवन्तिका वकुल चम्पक पाटलाब्जैः
पुन्नाग जाति करवीर रसाल पुष्पैः ।
विल्व प्रवाल तुलसीदल मंजरीभिः
त्वां पूजयामि जगदीश्वरि ! मे प्रसीद ॥

॥ इति पुष्पांजलिः ॥



॥ आदित्य-स्तोत्र ॥

॥ सूर्याय नमः ॥

नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक् ।
पीडा च दुःसहा राजञ्जायते सततं नृणाम् ॥१॥
पीड़ा नाशाय राजेन्द्र नामानि शृणु भास्वतः ।
सूर्यादीनां च सर्वेषां पीडा नश्यति शृण्वतः ॥२॥
आदित्यः सविता सूर्यः पूषार्कः शीघ्रगो रविः ।
भगस्त्वष्टार्यमा हंसो हेलिस्तेजोनिधिर्हरिः ॥३॥
दिननाथो दिनकरः सप्तसप्तिः प्रभाकरः ।
विभावसुर्वेदकर्ता वेदाङ्गो वेदवाहनः ॥४॥
हरिदश्वः कालवक्त्रः कर्मसाक्षी जगत्पतिः ।
पद्मिनीबोधको भानुर्भास्करः करुणाकरः ॥५॥
द्वादशात्मा विश्वकर्मा लोहिताङ्गस्तमोनुदः ।
जगन्नाथोऽरविन्दाक्षः कालात्मा कश्यपात्मजः ॥६॥
भूताश्रयो ग्रहपतिः सर्वलोकनमस्कृतः ।
जपाकुसुमसंकाशो भास्वानदितिनन्दनः ॥७॥
ध्वान्तेभसिंहः सर्वात्मा लोकनेत्रो विकर्तनः ।
मार्तण्डो मिहिरः सूरस्तपनो लोकतापनः ॥८॥

सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः ।
लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः ॥३॥
रक्तमाल्यधरो हेमकुण्डली ग्रहनायकः ।
नामान्येतानि भौमस्य यः पठेत्सततं नरः ॥४॥
ऋणं तस्य च दौर्भाग्यं दारिद्रयं च विनश्यति ।
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम् ॥५॥
वंशोद्योतकरं पुत्रं लभते नात्र संशयः ।
योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकैः ॥६॥
सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम् ॥७॥

॥ ऋणमोचकमंगलस्तोत्रम् ॥

मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।
स्थिरासनो महाकायः सर्वकर्मविरोधकः ॥१॥
लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूतिदो भूमिनन्दन ॥२॥
अङ्गारको यमश्चैव सर्वरोगापहारकः ।
वृष्टेः कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥३॥
एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् ।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥४॥

धरणी गर्भसंभूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥५॥
स्तोत्रमङ्गारकस्यैतत्पठनीय सदा नृभिः ।
न तेषां भौमजा पीडा स्वल्पापि भवति क्वचित् ॥६॥
अङ्गारक महाभाग भगवन्भक्तवत्सल ।
त्वां नमामि ममाशेषमृणमाशु विनाशय ॥७॥
ऋणरोगादिदारिद्रयं ये चान्ये ह्यपमृत्यवः ।
भयक्लेशमनस्तापा नश्यन्तु मम सर्वदा ॥८॥
अतिवक्र दुराध्य भोगमुक्तजितात्मनः ।
तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥
विरञ्चिशङ्करविष्णूनां मनुष्याणां तु का कथा ।
तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबला ॥१०॥
पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः ।
ऋणदारिद्यदुःखेन शत्रूणां च भयात्ततः ॥११॥
एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम् ।
महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ॥१२॥

॥ बुधपञ्चविंशतिनामस्तोत्रम् ॥

बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः ।
प्रियङ्गुकलिकाश्यामः कञ्जनेत्रो मनोहरः ॥१॥

ग्रहोपमो रौहिणेयो नक्षत्रेशो दयाकरः ।
विरुद्धकार्यहन्ता च सौम्यो बुद्धिविवर्धनः ॥२॥

चन्द्रात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः ।
ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः ॥३॥

लोकप्रियः सौम्यमूर्तिगुणदो गुणिवत्सलः ।
पञ्चविंशतिनामानि बुधस्यैतानि यः पठेत् ॥४॥

स्मृत्वा बुधं सदा तस्य पीड़ा सर्वा विनश्यति ।
तद्दिने वा पठेद्यस्तु लभते स म .ोगतम् ॥५॥

॥ बृहस्पति स्तोत्रम् ॥

गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदां वरः ।
वागीशोधिषणोद.र्घश्मश्रुः पीताम्बरो युवा ॥ १॥

सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः ।
दयाकरः सौम्यमूर्तिः सुरार्च्यः कुङ्कुमद्युतिः ॥२॥

लोकपूज्यो लोकगुरुर्नीतिज्ञो नीतिकारकः ।
तारापतिश्चाङ्गिरसो वेदवैद्यपितामहः ॥ ३॥

भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत् ।
अरोगी बलवान् श्रीमान्पुत्रवान्स भवेन्नरः ॥४॥

जीवेद्वर्षशतं मर्त्यो पापं नश्यति नश्यति ।
यः पूजयेद्गुरुदिने पीतगन्धाक्षताम्बरैः ॥५॥
पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम् ।
ब्राह्मणान्भोजयित्वा च पीडाशान्तिर्भवेद्गुरोः ॥६॥
(इति श्रीस्कन्दपुराणे बृहस्पतिस्तोत्रं सम्पूर्णम्)

॥ शुक्रस्तोत्रम् ॥

शुक्र काव्यः शुक्ररेता शुक्लाम्बरधरः सुधीः ।
हिमाभ कुन्दधवलः शुभ्रांशुः शुक्लभूषणः ॥१॥
नीतिज्ञो नीतिकृन्नीतिमार्गगामी ग्रहाधिपः ।
उशना वेदवेदाङ्गपारगः कविरात्मवित् ॥२॥
भार्गव करुणासिन्धुर्ज्ञानगम्यः सुतप्रदः ।
शुक्रस्यैतानि नामानि शुक्रं स्मृत्वा तु यः पठेत् ॥३॥
आयुर्धनं सुखं पुत्रं लक्ष्मीं वसतिमुत्तमाम् ।
विद्यां चैव स्वयं तस्मै शुक्रस्तुष्टो ददाति च ॥४॥
(इति श्रीस्कन्दपुराणे शुक्रस्तोत्रं सम्पूर्णम्)

शनैश्चर-स्तवराजः ॥

नारद उवाच—
ध्यात्वा गणपतिं राजा धर्मराजो युधिष्ठिरः ।
धीरः शनैश्चरस्येमं चकार स्तवमुत्तमम् ॥१॥

शिरो मे भास्करः पातुः भालं छायासुतोऽवतु ।
कोटराक्षो दृशौ पातु शिखिकण्ठनिभःश्रुती ॥२॥
घ्राणं मे भीषणः पातु मुखं वलिमुखोऽवतु ।
स्कन्धौसंवर्तकः पातु भुजौ मे भयदोऽवतु ॥३॥
सौरिर्मे हृदयं पातु नाभिं शनैश्चरोऽवतु ।
ग्रहराजः कटिं पातु सर्वतो रविनन्दनः ॥४॥
पादौ मन्दगतिः पातु कृष्णः पात्वखिलं वपुः ।
रक्षामेतां पठेन्नित्यं सौरेर्नामबलैर्युताम ॥५॥
सुखी पुत्रो चिरायुश्च स भवेन्नात्र संशयः ।
ॐ सौरिः शनैश्चरः कृष्णोनीलोत्पल निभः शनिः । ६

शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणः ।
शिखिकण्ठनिभो नीलश्छायाहृदयनन्दनः ॥७।
कालदृष्टिः कोटराक्षः स्थूलरोमा वलीमुखः ।
दीर्घो निर्मांसगात्रस्तु शुष्को घोरो भयानकः ॥८॥
नीलांशुः क्रोधनो रौद्रो दीर्घश्मश्रुर्जटाधरः ।
मन्दमन्दगतिः खञ्जो तृप्त संवर्तको यमः । ९॥
ग्रहराजः कराली च सूर्यपुत्रो रविः शशिः ।
कुजो बुधो गुरु. का[illegible]ो भानुज. सिंहिकासुतः । १०॥

केतुर्देवपतिर्बाहुः कृतान्तो नैऋर्तस्तथा ।
शशी मरुत्कुबेरश्च ईशानः सुर आत्मभूः ।।११।।

विष्णुर्हरोगणपतिः कुमारः काम ईश्वरः ।
कर्ता हर्ता पालयिता राज्यभुग् राज्यदीपकः ।।१२।।

छायासुतः श्यामलाङ्गो धनहर्ता धनप्रदः ।
क्रूरकर्मविधाता च सर्वकर्मावरोधकः ।।१३।।

तुष्टो रुष्टः कामरूपः कामदो रविनन्दनः ।
ग्रहपीडाहरः शान्तो नक्षत्रेशो ग्रहेश्वरः ।।१४।।

स्थिरासनः स्थिरगतिर्महाकायो महाबलः ।
महाप्रभो महाकालः कालात्मा कालकालकः ।।१५।।

आदित्यभयदाता च मृत्युरादित्यनन्दनः ।
शतभिद्रूक्षदयितः त्रयोदशीतिथिप्रियः ।।१६।।

तिथ्यात्मकस्तिथिगणनो नक्षत्रगणनायकः ।
योगराशिर्मुहूर्तात्मा कर्त्तादिनपतिः प्रभुः ।।१७ ।।

शमीपुष्पप्रियः श्यामस्त्रैलोक्याभावदायकः ।
नीलवासाः क्रियासिन्धुर्नीलांजनचयच्छविः ।।१८।।

सर्वरोगहरो देवः सिद्धो देवगणस्तुतः ।
अष्टोत्तरशतं नाम्नां सौरेश्छायासुतस्य यः ।।१९।।

पठेन्नित्यं तस्य पीड़ा समस्ता नश्यति ध्रुवम् ।
कृत्वा पूजां पठेन्मर्त्यो भक्तिमान्यः स्तवं सदा ।।२०
विशेषतः शनिदिने पीडा तस्य विनश्यति ।
जन्मलग्ने स्थितिर्वापि गोचरे क्रूरराशिगे ।।२१।।
दशासु च गते सौरे तदा स्तवमिमं पठेत् ।
पूजयेद्यः शनिं भक्त्या शमीपुष्पाक्षताम्बरैः ।।२२।।
विधाय लोह प्रतिमां नरो दुःखाद्विमुच्यते ।
बाधात्वन्यग्रहाणां च यः पठेत्तस्य नश्यति ।।२३।।
भीतोभयाद्विमुच्येत बद्धो मुच्येत बन्धनात् ।
रोगी रोगाद्विमुच्येत नरः स्तवमिमं पठेत् ।।२४।
पुत्रवान्धनवान् श्रीमाञ्जायते नात्र संशयः ।।२५।

नारद उवाच—

स्तवं निशम्य पार्थस्य प्रत्यक्षोऽभूच्छनैश्चरः ।
दत्त्वा राज्ञे वरं कामं शनिश्चान्तर्दधे तदा ।।२६।।

(शनैश्चर स्तवम् समाप्तम्)

॥ शनिस्तोत्रम् ॥

अस्य श्रीशनैश्चरस्तोत्रस्य दशरथ ऋषिः शनैश्चरो देवता त्रिष्टुप् छन्दः शनैश्चर-प्रीत्यर्थं जपे विनियोगः ।

दशरथ उवाच —

कोणोऽन्तको रौद्रयमोऽथ बभ्रुः कृष्णः शनिपिङ्गलमन्दसौरिः। नित्यं स्मृता यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय ॥१॥

सुरासुराः किंपुरुषोरगेन्द्रा गन्धर्वविद्याधरपन्नगाश्च। पीडयन्ति सर्वे विषमस्थितेन तस्मै०॥२॥

नरा नरेन्द्राः पशवो मृगेन्द्रा वन्यश्च ये कीटपतङ्गभृंगाः। पीडयन्ति सर्वे विषमस्थितेन तस्मै०॥३॥

देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि। पीडयन्ति सर्वे विषमस्थितेन तस्मै०॥४॥

तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बरदानतो वा। प्रीणाति मन्त्रैर्निजवासरे च तस्मै० ॥५॥

प्रयागकूले यमुनातटे च सरस्वतीपुण्यजले गुहायाम्। यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै०॥६॥

अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखीस्यात्। गृहाद्गतो यो नु पुनः प्रयाति तस्मै० ॥७॥

स्रष्टा स्वयं भूर्भुवनत्रयस्य त्राता हरीशो हरते पिनाकी। एकस्त्रिधा ऋग्यजुः साममूर्तिस्तस्मै०।८

शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशु-
बांधवैश्च । पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्-
नोति निर्वाणप्रदं तदन्ते ॥९॥
कोणस्थः पिङ्गलो बभ्रु कृष्णो रौद्रोऽन्तको यमः ।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥१०
एतानि दश नामानि प्रातरुत्थाय यः पठेत् ।
शनैश्चरकृता पीडा न कदाचिद्भविष्यति ॥११॥

॥ संकट-नामाष्टकम् ॥

ॐ नारद उवाच --

जैगीषव्य मुनिश्रेष्ठ सर्वज्ञ सुखदायक ।
आख्यातानि सुपुण्यानि श्रुतानि त्वत्प्रसादतः ॥१॥
न तृप्ति मधिगच्छामि तव वागमृतेन च ।
वदस्वैकं महाभाग संकटाख्यानमुत्तमम् ॥२॥
इति तस्य वचः श्रुत्वा जैगीषव्योऽब्रवीत्ततः ।
संकष्टनाशनं स्तोत्रं शृणु देवर्षिसत्तम ॥३॥
द्वापरे तु पुरा वृत्ते भ्रष्टराज्यो युधिष्ठिरः ।
भ्रातृभिः सहितो राज्यनिर्वेदं परमं गतः ॥४॥
तदानीं तु ततः काशीं पुरीं यातो महामुनिः ।
मार्कण्डेय इति ख्यातः सह शिष्यैर्महायशः ॥५॥

तं दृष्ट्वा स समुत्थाय प्रणिपत्य सुपूजितः ।
किमर्थं म्लानवदनं एतत्त्वं मां निवेदय ।।६।।

युधिष्ठिर उवाच—

संकटं मे महत्प्राप्तमेतादृग्वदनं ततः ।
एतन्निवारणोपायं किंचिद्ब्रूहि मुने मम ।।७।।

मार्कण्डेय उवाच—

आनन्दकानने देवी संकटा नाम विश्रुता ।
वीरेश्वरोत्तरे भागे पूर्वं चन्द्रेश्वरस्य च ।।८।।

शृणु नामाष्टकं तस्याः सर्वसिद्धिकरं नृणाम् ।
संकटा प्रथमं नाम द्वितीयं विजया तथा ।।९।।

तृतीयं कामदा प्रोक्तं चतुर्थं दुःखहारिणी ।
शर्वाणी पञ्चमं नाम षष्ठं कात्यायनी तथा ।।१०।।

सप्तमं भीमनयना सर्वरोगहराऽष्टकम् ।
नामाष्टमिदं पुण्यं त्रिसंध्यं श्रद्धयान्वितः ।।११।।

यः पठेत्पाठयेद्वापि नरो मुच्येत संकटात ।
इत्युक्त्वा तु द्विजश्रेष्ठमृषिर्वाराणसीं ययौ ।।१२।।

इति तस्य वचः श्रुत्वा नारदो हर्षनिर्भरः ।
ततः संपूजितां देवीं वीरेश्वरसमन्विताम् ।।१३।।

भुजैस्तु दशभिर्युक्तां लोचनत्रय भूषिताम् ।
मालाकमण्डलुयुतां पद्मशङ्खगदायुताम् ॥१४॥
त्रिशूलडमरुधरां खड्गचर्मविभूषिताम् ।
वरदाभयहस्तां तां प्रणम्य विधिनन्दनः ॥१५॥
वारत्रयं गृहीत्वा तु ततो विष्णुपुरं ययौ ।
एतस्स्तोत्रस्य पठनं पुत्रपौत्र विवर्धनम् ॥१६॥
संकष्टनाशमं चैव त्रिषु लोकेषु विश्रुतम् ।
गोपनीयं प्रयत्नेन महावन्ध्याप्रसूतिकम् ॥१७॥
(इति श्रीपद्मपुराणे संकटानामाष्टकं सम्पूर्णम्)

॥ इन्द्राक्षी-स्तोत्रम् ॥

ॐ अस्य श्रीन्द्राक्षीस्तोत्रमन्त्रस्य सहस्राक्ष ऋषिः। इन्द्राक्षी देवता। अनुश्टुप छन्दः । महालक्ष्मीः बीजम् । भुवनेश्वरीति शक्तिः । भवानीति कीलकम् । ॐ श्रीं ह्रीं क्लीं इति बीजानि । मम सर्वाभीष्टसिद्ध्यर्थे श्रीमन्द्रिाक्षीस्तोत्र जपे विनियोगः ।

ॐ इन्द्राक्षी इत्यङ्गुष्ठाभ्यां नमः ।
ॐ महालक्ष्मीरिति तर्जनीभ्यां नमः ।
ॐ माहेश्वरीति मध्यमाभ्यां नमः ।
ॐ अम्बुजाक्षीत्यनामिकाभ्यां नमः ।

ॐ कात्यायनीति कनिष्ठिकभ्यां नमः ।
ॐ कौमारीति करतलकरपृष्ठाभ्यां नमः ।
ॐ इन्द्राक्षीति हृदयाय नमः ।
ॐ महालक्ष्मीरिति शिरसे स्वाहा ।
ॐ माहेश्वरीति शिखायै वौषट् ।
ॐ अम्बुजाक्षीति कवचाय हुम् ।
ॐ कात्यायनीति नेत्रत्रयाय वौषट् ।
ॐ कौमारीत्यस्त्राय फट् ।
भूर्भुवः स्वरोम इति दिग्बन्धनम् ।

पूर्बस्याँ पातु मां ब्राह्मी चाग्नेय्यां तु महेश्वरी ।
कौमारी पातु याम्ये वै नैर्ऋत्यां पातु भैरवी ।।१।।
पश्चिमे पातु वाराही बायव्ये नारसिंहिका ।
कालरात्रि रुदीच्यां वा ऐशान्यां सर्वशक्तिधृक् ।२।।
ऊर्ध्वं मे भैरवी पातु चाधस्थं विन्ध्यवासिनी ।
यद्यत्तु विषमं स्थानं तत्तद्रक्षतु चेश्वरी ।।३।।

अथ ध्यानम्--

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ।।४।।
इन्द्राक्षीं युवतीं देवीं नानालंकार भूषिताम् ।
प्रसन्नवदनाम्भोजामप्सरागण सेविताम् ।।

द्विभुजां सौम्यवदनां पाशाङ्कुशधरां पराम् ।
त्रैलोक्यमोहिनीं देवीमिन्द्राक्षींनामकीर्तिताम् ॥

अथ मन्त्रः । ॐ ऐं ह्रीं,श्रीं क्लीं क्लूं इन्द्राक्ष्यै नमः ।

इन्द्र उवाच--

इन्द्राक्षी नाम सा देवी देवतैः समुदाहृता ।
गौरी शाकंभरी देवी दुर्गानाम्नीति विश्रुता ॥
कात्यायनी महादेवी चन्द्रघण्टा महातपा ।
सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ॥
नारायणी भद्रकाली रुद्राक्षी कृष्णपिङ्गला ।
अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी ॥
मेघश्यामा सहस्राक्षी मुक्तकेशी जलोदरी ।
महादेवी मुक्तकेशी घोररूपा महाबला ।
अजिला भद्रदा नन्दा रोगहन्त्री शिवप्रिया ।
शिवदूती कराली च प्रत्यक्षा परमेश्वरी ॥
सदा संमोहिनी देवी सुन्दरी भुवनेश्वरी ।
इन्द्राक्षी इन्द्ररूपा च इन्द्रशक्तिः परायणा ॥
महिषासुरसंहंत्री चामुण्डा गर्भदेवता ।
वाराही नारसिंही च भीमा भैरवनादिनी ॥

श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ।
अनन्ता विजया पूर्णा मानस्तोकाऽपराजिता ॥
भवानी पार्वती दुर्गाहैमवत्यम्बिका शिवा ।
एतैर्नामशतैर्दिव्यैः स्तुता शक्रेण धीमता ॥
आयुरारोग्यमैश्वर्यं वित्तं ज्ञानं यशो बलम् ।
नाभिमात्रे जले स्थित्वा सहस्रपरिसंख्यया ॥
जपेत्स्तोत्रमिमं मन्त्रं वाचां सिद्धिर्भवेत्ततः ।
अनेन विधिना भक्त्या मन्त्रसिद्धिश्च जायते ॥
संतुष्टा च भवेद्देवी प्रत्यक्ष संप्रजायते ।
शतमावर्तयेद्यस्तु मुच्यते नात्र संशयः ॥
आवर्तनसहस्रेण लभ्यते वाञ्छितं फलम् ।
सायं शतं पठेन्नित्यं षण्मासात्सिद्धिकथ्यते ॥
चोरव्याधि भयस्थाने मनसा ह्यनुचिन्तयन् ।
सवंत्सरमुपाश्रित्य सर्वकामार्थसिद्धये ॥
राजानं वश्यमाप्नोति षण्मासान्नात्र संशयः ।

॥ दुर्गापदुद्धार-स्तोत्रम् ॥

नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके
विश्वरूपे ।

नमस्ते जगद्वन्द्यपादारविन्दे नमस्ते जगत्तारिणि
त्राहि दुर्गे ॥

नमस्ते जगच्चिन्त्यमानस्वरूपे नमस्ते महायोगिनि ज्ञानरूपे । नमस्ते नमस्ते सदानन्दरूपे नम० ।

अनाथस्य दीनस्य तृष्णातुरस्य भयार्तस्य भीतस्य बद्धस्य जन्तोः। त्वमेका गतिर्देवि निस्तारकर्त्री नम०।

अरण्ये रणे दारुणे शत्रुमध्येऽनले सागरे प्रान्तरे राजगेहे । त्वमेका गतिर्देवि निस्तारनौका नम० ।

अपारे महादुस्तरेऽत्यन्तघोरे विपत्सागरे मज्जतां देहभाजाम् । त्वमेका गतिर्देवि निस्तारहेतुः नम० ।

नमश्चण्डिके चण्डदुर्दण्डलीलासमुत्खण्डिताखण्डिताशेषशत्रोः । त्वमेका गतिर्देवि निस्तारबीजं नम० ।

त्वमेवाद्यभावाधृतासत्यवादीर्न जाताजिताक्रोधनात्क्रोधनिष्ठा । इडा पिङ्गला त्वं सुषुम्ना च नाड़ी, नम० ।

नमो देवि दुर्गे शिवे भीमनादे सरस्वत्यरुन्धत्यमोघस्वरूपे । विभूतिः शचीकालरात्रिः सती त्वं, नम० ।

शरणमसि सुराणां सिद्धविद्याधराणां,
मुनिमनुजपशूनां दस्युभिस्त्रासितानाम् ।

नृपतिगृहगतानां व्याधिभिः पीडितानां,
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥


इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम् ।
त्रिसंध्यमेकसंध्यं वा पठनाद्घोरसंकटात् ॥

मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ।
सर्वं वा श्लोकमेकं वा यः पठेद्भक्तिमान् सदा ॥

स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम् ।
पठनादस्य देवेशि किं न सिध्यति भूतले ॥

स्तवराजमिदं देवि संक्षेपात्कथितं मया ॥

(इति श्रीसिद्धेश्वरीतन्त्रे उमामहेश्वरसंवादे
श्रीदुर्गापदुद्धारस्तोत्रम्)



॥ अथ चण्डिका दल प्रारम्भः ॥

ॐ नमश्चण्डिकायै ॥ अथातः सम्प्रवक्ष्यामि चण्डिका दलमुत्तमम् । मन्त्रं विना तु जप्त्वा तत्सर्वं निष्फलं भवेत् ॥१॥

ॐ नमो भगवति ! जय जय चामुण्डे, चण्डि, चण्डेश्वरि, चण्डायुधे । चण्डरूपधारिणिताण्डव प्रिये ॥

कुण्डलीभूतदिङ् नागमण्डलीकृत गण्डस्थले, समस्त जगदण्डसंहारकारिणि, परे; अनन्तानन्तरूपे ॥

शिवे, नरशिरोमालालंकृत वक्षस्थले, महाकपाल-भालोज्वलन्मणि मुकुट चूड़ावतंस चन्द्रखण्डे, महा-भीषणे देवि ॥

महामायेषोडश कलापरिवृतोल्लासितेमहादेवासुर नरनिहरुधिरार्द्रीकृतालम्बिततनु कमलोद्भासित करे॥

